IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# मानदीपिकाकायां तथा विष्णुसहस्रनामभाष्ये तदितरग्रन्थेषु च हरि-हराभेदप्रतिपादनम् ।

निरंजन हरिश्चन्द्र भट्टः,
शोधच्छात्रः, अद्वैतवेदान्तविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीराजीवगान्धीपरिसरः,शृङ्गेरी, भारतम्

सर्वे आस्तिकाः परमात्मानम् अङ्गीकुर्वन्ति एव । एवं परमात्मानं स्वरूपं त्रिविधम् ब्रह्म-विष्णु-शिवश्चेति । एवं च श्रुत्या ब्रह्मादिषु अभेदः निर्णितः चेदपि काले काले मतिवैशम्येत नैक वादः उत्पन्नः । तत्र केचन हरिरेव उत्तमः शिवः अधमः इति कथयन्ति एवं च केचन ब्रह्म एव देवः यतः स एव सृष्टिकर्ता इति प्रकथयन्ति । एवमेव शिव एव परमेश्वरः इति च वदन्ति । एवमन्येऽपि शक्तिवादिनः, गाणपत्याः सौराः इत्यादि । किन्तु प्रमुख्येन काले हरिहरयोः भेदः तयोर्मध्ये वैशम्यभावः अस्तीति जनाः श्रुतेः भावम् अन्यथावगम्य अन्यथैव व्याचिख्यासुः । एवं च श्रुत्यभीप्सितं न हरि हरयोः भेदः किन्तु अभेद एव इति स्पष्टम् अवगम्यते । उक्तं च श्रुति, स्मृति, पुराणादिषु- "एको देवः सर्वभूतेषुगूढः" इत्यादि। एवं च परमात्मनः यत् स्वरूपं त्रिमूर्तिरूपेण तदपि तस्य स्वरूपतेवन न किन्तु मायायाः कार्यभूतेन सत्वरजस्तमोगुणेन इति पुराणादिषु द्रष्टुं शक्यते । एवम् "अत्मौपम्येन सर्वत्र" , एकमेवाद्वितीयं ब्रह्म इत्यादिना सिद्धमेव यत् परमात्मनः स्वरूपं तदेकमेव किन्तु सृष्ट्यादिकार्यनिर्वाहाय मायाशबलितः परमात्मा औपादिकेन नाना रूपेण भासते इति ।

सङ्केताक्षरसूचि
W.P. – Web page
E.B. – Edited by
F.E. – First edition
प्र – प्रकरण
सं - सम्पादकः

अद्वितीयं ब्रह्म इति उपनिषत्सिद्धान्तः । तथा च श्रुतिः "एकमेवाद्वितीयम्"[1] इति । सः परमात्मा, मायायाः सत्त्वरजस्तमोगुणानां कार्याणि भवन्ति प्रपञ्चसृष्टिस्थितिलयाः, तन्निर्वाहाय प्रत्येकस्मिन्नपि युगे तस्याः गुणत्रयमाधृत्य ब्रह्मविष्णुशिवत्वेन शरीरधारणं करोति इति । के ते हरिहरब्रह्माणः? तेषां स्वरूपं च किम् ? त्रिमूर्तयः परस्परं भिन्नाः उत न ? हरिहरयोः भेदो वा अभेदो वा इति ।

एवं आह अत्रिमहर्षिः भागवते -
"विश्वोद्भवस्थितिलयेषु विभज्यमानैः ।
मायागुणैरनुयुगं विगृहीतदेहाः ।
ते ब्रह्मविष्णुगिरीशाः प्रणतोऽस्म्यहं वः ।
तेभ्यः क एव भवतां मे इहोपहूतः ॥"[2] इति ।

"श्विश्वस्योद्भवस्थितिलयेषु पृथक् पृथक् क्रियमाणैः मायायाः प्रकृतेः गुणैः रजस्सत्त्वतमस्सञ्ज्ञैः अनुगुणं कार्यानुकूल सृष्टये रजोगुणप्रवर्तकत्वेन, रक्षणाय सत्वगुणप्रवर्तकत्वेन, संहाराय

[1] छान्दोग्योपनिषत् (६/२/१) छान्दोग्योपनिषत्. सानुवादशाङ्कभाष्यसहित, गीताप्रेस्, गोरख्पुर(गोविन्दभवन-कार्यालय,कोलकाता का संस्थान),२७००५,
[2] भागवतपुराण ४.१.२७, E.B. एन्.सि.वि.नरसिम्हाचार्य, श्रीमद्भागवतमहापुराण स्कन्द-४, T.T.D. Religious Publication, Series No- 649, F.E.1 - 2004, L.I. https://archive.org/details/srimad-bhagavata-mahapuranamu-skanda-iv-purana-ithihasa-project-by-ttd-in-sanskrit/page/15/mode/2up

तमोगुणप्रवर्तकत्वेन प्रगुहीतो देहो यैस्ते प्रगृहीतदेहाः स्वीकृतावताराः"[3] "इमा रुद्राय स्थिरधन्वने गिरः । क्षिपेषवे देवाय स्वधाम्ने"[4] इति च ऋग्वेदे । इति पुराणे हरिहरब्रह्मणां स्वरूपं कीदृशं इति बादरायणाचार्याः वर्णितवन्तः ।

एवं च महाभारते विष्णुसहस्रनाम्नि "कार्यभूतविरिञ्चिच्यादिनामभिरपि उपपन्नस्तुतिः विष्णोरिति"[5] शङ्कराचार्यणां भाष्यम् । तथा "संहृतौ विशन्ति सर्वाणि भूतानि अस्मिन् इति विश्वं ब्रह्म"[6] तमोगुणापन्नं परमात्मस्वरूपं शिवं, "यत्प्रयन्त्यभिसंविशन्ति" इति श्रुतिः । एवमेव "विशतीति विश्वं ब्रह्म"[7] रजोगुणापन्नं परमात्मस्वरूपं ब्रह्माणं, "तत्सृष्ट्वा तदेवानुप्राविशत्"[8] इति श्रुतिः । "विशति अत्र चाखिलं विशति इत्युभयथापि विश्वं ब्रह्मा"[9] इति सत्त्वगुणापन्नं परमात्मस्वरूपं विष्णुं "अन्यत्र धर्मादन्यत्राधर्मात्"[10] इति कठोपनिषदि । एवं त्रिमूर्तीनां सत्त्वरजस्तमोगुणमादत्य विहितं सृष्टिस्थितिलयाः, ते च अद्वितीयब्रह्मणः एव इति श्रुत्या स्मृत्या च ज्ञायते ।

इममेवार्थं बालब्रह्मानन्दयतयः स्वग्रन्थे मानदीपिकायाम् एवं उक्तवन्तः

"मायागुणभेदेन रुद्रं विष्णुं पितामहम् ।
सृष्ट्वातु प्रविशतेषामन्तर्यामितया हरः" ।[11]

"एको देवः सर्वभूतेषु गूढः"[12] "एकं सद्विविप्राः बहुधा वदन्ति"[13] इत्याद्याः श्रुतयः अपि इममेवार्थं प्रतिपादयन्ति ।

एवं च महानारायणोपनिषदि "एको ह वै नारायण आसीत् । न ब्रह्मा न ईशानो..[14]" ।

इति अत्र आपाततः पश्यामः चेत् अदौ सत्वगुणापन्नः नारायणः एव आसीत् इति ज्ञायते चेदपि तत्पर्यलिङ्गैः त्रिमूर्तीनाम् अभेदः अत्र प्रतिपादितं इति अवगन्तुम् शक्नुमः । यतोहि मध्ये "स एकाकी नर एव"[15] इति तस्यैव पुरुषस्य जीवत्व संज्ञा । अन्ते च "स ब्रह्मा स ईशानः सोऽक्षरः परमः स्वराट् "[16]॥ इति च रुद्र ब्रह्मत्वेन व्यवहारः ।

एवं च विष्णुपुराणे अपि

"जुषन् रजोगुणं तत्र स्वयं विश्वेश्वरो हरिः ।
ब्रह्मा भूत्वास्य जगतः विसृष्टौ संप्रवर्तते ॥
सृष्टं च पात्यनुयुगं यावत्कल्पविकल्पना ।
सत्वभृद्भगवान्विष्णुः अप्रमेयपराक्रमः॥
तमोद्रेकी च कल्पान्ते रुद्ररूपी जनार्दनः।
मैत्रेयाखिलभूतानि भक्षयत्यतिदारुणः॥"[17]

---

[3] श्रीवीरराघवविदुषा लिखिता भागवतचनद्रचन्दरिका टिका , E.B. एन्.सि.वि.नरसिम्हाचार्य, श्रीमद्भागवतमहापुराण स्कन्द-४, T.T.D. Religious Publication, Series No- 649, F.E.1 - 2004, L.I. https://archive.org/details/srimad-bhagavata-mahapuranamu-skanda-iv-purana-ithihasa-project-by-ttd-in-sanskrit/page/15/mode/2up

[44] ऋग्वेद मण्डाल ७/सूक्त ४६/मन्त्र १

[5] विष्णुसहस्रनामशाङ्करभाष्यम् १४ श्रीशाङ्करग्रन्थावलिः,लघुभाष्याणी, समता बुक्स्, १०कामराजभवन,५७३,मौन्ट् रोड्, चेन्नै, ६०००० ६, भारत, १९९९

[6] विष्णुसहस्रनामशाङ्करभाष्यम् १४ श्रीशाङ्करग्रन्थावलिः,लघुभाष्याणी, समता बुक्स्, १०कामराजभवन,५७३,मौन्ट् रोड्, चेन्नै, ६०००० ६, भारत, १९९९

[7] विष्णुसहस्रनामशाङ्करभाष्यम् १४ श्रीशाङ्करग्रन्थावलिः,लघुभाष्याणी, समता बुक्स्, १०कामराजभवन,५७३,मौन्ट् रोड्, चेन्नै, ६०००० ६, भारत, १९९९

[8] तैत्तिरीयोपनिषत्, ब्रह्मानन्दवल्लि , . सं.एस्.सुब्रह्मण्यशास्त्री, उपनिषद्भाष्यम्, श्री दक्षिणामूर्तिमठ प्रकाशन, वारणासी, डि-४९/९, २०१२

[9] विष्णुसहस्रनामशाङ्करभाष्यम् १४ श्रीशाङ्करग्रन्थावलिः,लघुभाष्याणी, समता बुक्स्, १०कामराजभवन,५७३,मौन्ट् रोड्, चेन्नै, ६०००० ६, भारत, १९९९

[10] कठोपनिषत् १/२/१४ सं.एस्.सुब्रह्मण्यशास्त्री, उपनिषद्भाष्यम्, श्री दक्षिणामूर्तिमठ प्रकाशन, वारणासी, डि-४९/९, २०१२

[11] मानदीपिका प्र.२ बालब्रह्मानन्द यतिः एतावता अप्रकाशितम्

[12] श्वेताश्वतर उपनिषत् (६/११) श्वेताश्वतरौपनिषत्, मूल-प्रतिपदार्थ-तात्पर्य टिप्पणि सहिता, श्री रामकृष्णाश्रम, मैसूरु, ५७००२०, १९८१

[13] ऋग्वेद (१.१६४.४६) ऋग्वेद-संहिता, राष्ट्रीयसंस्कृतसंस्थन, मानितविश्वविद्यालयः,५६-५७,इन्स्टिट्यूशनल् एरिया, जनकपुरि नई दिल्लि – ११००५८, २००६

[14] चतुर्वेदोपनिषत्, सं- डा. चि. कुञ्जन् , अप्रकाशिता उपनिषदः, प्रि. वेदान्त प्रेस्, अड्यार्, मद्रास्, १९३३ located in W.P. https://archive.org/details/Aprakashita.Upanishad/mode/2up

[15] चतुर्वेदोपनिषत्, सं- डा. चि. कुञ्जन् , अप्रकाशिता उपनिषदः, प्रि. वेदान्त प्रेस्, अड्यार्, मद्रास्, १९३३ located in W.P. https://archive.org/details/Aprakashita.Upanishad/mode/2up

[16] चतुर्वेदोपनिषत्, सं- डा. चि. कुञ्जन् , अप्रकाशिता उपनिषदः, प्रि. वेदान्त प्रेस्, अड्यार्, मद्रास्, १९३३ located in W.P. https://archive.org/details/Aprakashita.Upanishad/mode/2up

[17] □□□□□□□□□□□ □/□/□□-□□ □□□□□□□□□□□, □□□□□□□□□(□□□□□□□□□□□-□□□□□□□□□,□□□□□□□□ □□ □□□□□□□□),□□□□□□

एवं च मानदीपिकाकाराः बालब्रह्मानन्दयतयः अपि स्व ग्रन्थे मानदीपिकायां द्वितीये प्रकरणे

“रुद्रोवैविष्णुरूपेणपालयत्यखिलं जगत् ।
ब्रह्मरूपेणसृजति तदन्त्यं ते स्वयं हरः ।
निर्गुणोपिपरानन्दोगुणवानिवभाति यः ।
ब्रह्मविष्णुशिवाख्यस्तु भेदवानिवलक्ष्यते ।”[18] इति अदुः

एवं च श्रुतिः “यः तन्तुनाभ इव तन्तुभिः प्रधाजैः स्वभावतः देव एकः स्वमावृणोत्”[19] इत्येक्त्वं संसूचयति ।

सहस्र नाम्नि एव भूतकृत् "सत्वगुणम् अधिष्टाय भूतानि बिभर्ति पालयति धारयति पोषयतीति वा भूतकृत्"[20] विष्णुः।

“रजोगुणं समाश्रित्य विरिंचिरूपेण भूतानि करोति इति भूतकृत् ब्रह्मा।”[21]

“तमोगुणमास्थाय स रुद्रात्मना भूतान् कृन्तति कृणोति हिनस्ति इति वा भूतकृत् शिवः ।”[22]

कृन्तति कृतिछेदने इति धातुः[23] कृणोति कृञ् हिंसायाम् इति धातोः क्विप् प्रत्यये नुगागमे च कृणोति ।

एवं च यदि विष्णुसहस्रनामम् अवलोकयामः तत्रादौ युधिष्टिरस्य प्रश्नाः

किमेकं दैवतं लोके? किं वाप्येकं परायणम्? इति एवं च किं जपन् जन्म संसार बन्धनात् मुच्यते ? तत्प्रति भिष्माचार्याणां प्रतिवचनं “यतः सर्वाणि भूतानि भवन्त्यादियुगागमे , यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये तस्य”[24] इति एवमेव अदौ अपि अभेदेनैव आरम्भः उपान्त्ये अपि “एकोविष्णुः महद्भूतं पृठग्भूतान्यनेकशः” इति एवम् उपक्रमोपसंहारादि तात्पर्यलिङैः अपि अभेदः एव त्रिमूर्त्तिषु ज्ञायते

एवं च “अन्तर्बहिश्च तत्सर्वं व्याप्यनारायनस्थितः”[25] “ब्रह्मा नारायणः”[26] “शिवश्च नारायण”[27] “स एक”[28] , “एक एवासीत्”[29], “शान्तं शिवमद्वैतं”[30] इत्यादि श्रुत्या उदाहृत स्मृत्या च हरिहरब्रह्मणाम् अभेदः इति ज्ञायते ।

“शिवो महेश्वरश्चैव रुद्रो विष्णुः पितामहः ।।
संसारवैद्यस्सर्वज्ञः परमात्मेति मुख्यतः ।। १ ।।
नामाष्टकमिदं नित्यं शिवस्य प्रतिपादकम् ।।
आद्यन्तपञ्चकन्तत्र शान्त्यतीताद्यनुक्रमात् ।।२।।”[31] इति शम् ।

### I. ACKNOWLEDGMENT

एवं च “अन्तर्बहिश्च तत्सर्वं व्याप्यनारायनस्थितः”[32] “ब्रह्मा नारायणः”[33] “शिवश्च नारायण”[34] “स एक”[35] , “एक एवासीत्”[36], “शान्तं शिवमद्वैतं”[37] इत्यादि श्रुत्या उदाहृत स्मृत्या च हरिहरब्रह्मणाम् अभेदः इति ज्ञायते ।

[18] मानदीपिका प्र.२ एतावता अप्रकासितम्
[19] श्वेताश्वतर उपनिषत् (६/१०) श्वेताश्वतरौपनिषत् मूल-प्रतिपदार्थ-तात्पर्य टिप्पणि सहिता, श्री रामकृष्णाश्रम, मैसूरु, ५७००२०, १९८१
[20] विष्णुसहस्रनामशाङ्करभाष्यम् १४ श्रीशाङ्करग्रन्थावलिः,लघुभाष्याणी, समता बुक्स्, १०कामराजभवन,५७३,मौन्ट् रोड्, चेन्नै, ६००००६, भारत, १९९९
[21] विष्णुसहस्रनामशाङ्करभाष्यम् १४ श्रीशाङ्करग्रन्थावलिः,लघुभाष्याणी, समता बुक्स्, १०कामराजभवन,५७३,मौन्ट् रोड्, चेन्नै, ६००००६, भारत, १९९९
[22] विष्णुसहस्रनामशाङ्करभाष्यम् १४ श्रीशाङ्करग्रन्थावलिः,लघुभाष्याणी, समता बुक्स्, १०कामराजभवन,५७३,मौन्ट् रोड्, चेन्नै, ६००००६, भारत, १९९९
[23] पाणिनीयधातुपाठः ६/११४, डा.माया ए. चैनानी, धातुपाठों में अर्थनिर्देश, विद्यानिधि प्रकाशन, डी-१०/१०६१ खजूरि खास, दिल्लि – ११००९०, २०१९
[24] विष्णुसहस्रनाम युधिष्ठिरस्य प्रश्नः । श्रीशाङ्करग्रन्थावलिः,लघुभाष्याणी, समता बुक्स्, १०कामराजभवन,५७३,मौन्ट् रोड्, चेन्नै, ६००००६, भारत, १९९९
[25] नारायणोपनिषत्, सं. डा. गङ्गासागररायः, नारायणोपनिषत्, रत्ना पब्लिकेशन्स्, बी. २१/४२ए, कमच्छा,वारणासी-१, १९८५
[26] नारायणथर्व उपनिषत् W.P. Vande Mataram Library Trust (VMLT), Gurugram & AuroBharati , Puducherry
[27] नारायणथर्व उपनिषत् W.P. Vande Mataram Library Trust (VMLT), Gurugram & AuroBharati , Puducherry
[28] तैत्तिरीयोपनिषत्, ब्रह्मानन्दवल्लि , . सं.एस्.सुब्रह्मण्यशास्त्री, उपनिषद्भाष्यम्, श्री दक्षिणामूर्तिमठ प्रकाशन, वारणासी, डि-४९/९, २०१२
[29] छान्दोग्योपनिषत् (६/२/१) छान्दोग्योपनिषत्. सानुवादशाङ्कभाष्यसहित, गीताप्रेस्, गोरख्पुर(गोविन्दभवन-कार्यालय,कोलकाता का संस्थान),२७००५,
[30] माण्डूक्योपनिषत् ७. सं.एस्.सुब्रह्मण्यशास्त्री, उपनिषद्भाष्यम्, श्री दक्षिणामूर्तिमठ प्रकाशन, वारणासी, डि-४९/९, २०१२
[31] शिवपुराणम् ६/९/१-२ गीताप्रेस्, गोरख्पुर(गोविन्दभवन-कार्यालय,कोलकाता का संस्थान),२७००५
[32] नारायणोपनिषत्, सं. डा. गङ्गासागररायः, नारायणोपनिषत्, रत्ना पब्लिकेशन्स्, बी. २१/४२ए, कमच्छा,वारणासी-१, १९८५
[33] नारायणथर्व उपनिषत् W.P. Vande Mataram Library Trust (VMLT), Gurugram & AuroBharati , Puducherry
[34] नारायणथर्व उपनिषत् W.P. Vande Mataram Library Trust (VMLT), Gurugram & AuroBharati , Puducherry
[35] तैत्तिरीयोपनिषत्, ब्रह्मानन्दवल्लि , . सं.एस्.सुब्रह्मण्यशास्त्री, उपनिषद्भाष्यम्, श्री दक्षिणामूर्तिमठ प्रकाशन, वारणासी, डि-४९/९, २०१२
[36] छान्दोग्योपनिषत् (६/२/१) छान्दोग्योपनिषत्. सानुवादशाङ्कभाष्यसहित, गीताप्रेस्, गोरख्पुर(गोविन्दभवन-कार्यालय,कोलकाता का संस्थान),२७००५,
[37] माण्डूक्योपनिषत् ७. सं.एस्.सुब्रह्मण्यशास्त्री, उपनिषद्भाष्यम्, श्री दक्षिणामूर्तिमठ प्रकाशन, वारणासी, डि-४९/९, २०१२

"शिवो महेश्वरश्चैव रुद्रो विष्णुः पितामहः ।।
संसारवैद्यस्सर्वज्ञः परमात्मेति मुख्यतः ।। १ ।।
नामाष्टकमिदं नित्यं शिवस्य प्रतिपादकम् ।।
आद्यन्तपञ्चकन्तत्र शान्त्यतीताद्यनुक्रमात् ।।२।।"[38] इति शम् ।

## REFERENCES


1. छान्दोग्योपनिषत्. सानुवादशाङ्कभाष्यसहित,गीताप्रेस्, गोरख्पुर(गोविन्दभवन-कार्यालय,कोलकाता का संस्थान),२७००५
2. शिवमहापुराणम्,गीताप्रेस्, गोरख्पुर(गोविन्दभवन-कार्यालय,कोलकाता का संस्थान),२७००५
3. श्वेताश्वतरौपनिषत् मूल-प्रतिपदार्थ-तात्पर्य टिप्पणि सहिता, श्री रामकृष्णाश्रम, मैसूरु, ५७०००२०
4. सं-श्रीमन्मोक्षमूलभट्टः, ऋग्वेद-संहिता, राष्ट्रीयसंस्कृतसंस्थन, मानितविश्वविद्यालयः,५६-५७,इन्स्टिट्यूशनल् एरिया, जनकपुरि नई दिल्लि - ११००५८ , २००६
5. डा.माया ए. चैनानी, धातुपाठों में अर्थनिर्देश, विद्यानिधि प्रकाशन, डी-१०/१०६१ खजूरि खास, दिल्लि - ११००९०, २०१९
6. सं. डा. गङ्गासागररायः, नारायणोपनिषत्, रत्ना पब्लिकेशन्स्, बी. २१/४२ए, कमच्छा,वाराणसी-१, १९८५
7. सं- डा. चि. कुञ्जन्, अप्रकाशिता उपनिषदः, वेदान्त प्रेस्, अड्यार्, मद्रास्, १९३३
8. E.B. एन्.सि.वि.नरसिम्हाचार्य, श्रीमद्भागवतमहापुराण स्कन्द-४, T.T.D. Religious Publication, Series No- 649, 2004
9. सं.एस्.सुब्रह्मण्यशास्त्री, उपनिषद्भाष्यम्, श्री दक्षिणामूर्तिमठ प्रकाशन, वाराणसी, डि-४९/९, २०१२
10. डा. अशोक चटर्जी शास्त्री, पद्मपुराण, परिमल, पब्लिकेशन्स्, दिल्लि, २०१२
11. वेब् सैट्, चतुर्वेदोपनिषत्, Vande Mataram Library Trust (VMLT), Gurugram & AuroBharati , Puducherry
12. विष्णु महापुराण मूल हिन्दि अनुवाद तथा सहिता, नागप्रकाशक, ११ ए.यू.ए. जहवर नगर दिल्ली - ११०००७, १९९८


[38] शिवपुराणम् ६/९/१-२ गीताप्रेस्, गोरख्पुर(गोविन्दभवन-कार्यालय,कोलकाता का संस्थान),२७००५